Vishnu Sahasranamam Lyrics in English: Full Text

From Diya, https://www.trydiya.com/prayers-mantras/vishnu-sahasranamam

ॐ	Om
श्रीपरमात्मने नमः ।	Shreeparamaatmane namah |
नारायणं नमस्कृत्य नरं चैव नरोत्तमम्।	Naaraayanam namaskritya naram chaiva narottamam|
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥	Deveem sarasvateem vyaasam tato jayamudeerayet||
ॐ अथ सकलसौभाग्यदायकं श्रीविष्णुसहस्रनामस्तोत्रम्।	Om atha sakalasaubhaagyadaayakam shreevishnusahasranaamastotram|
हरिः ॐ ॥	Harih Om ||
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।	Shuklaambaradharam vishnum shashivarnam chaturbhujam|
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १॥	Prasannavadanam dhyaayetsarvavighnopashaantaye || 1||
यस्य द्विरदवक्त्राद्याः पारिषद्याः परः शतम्।	Yasya dviradavaktraadyaah paarishadyaah parah shatam|
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥ २॥	Vighnam nighnanti satatam vishvaksenam tamaashraye || 2||
व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।	Vyaasam vasishthanaptaaram shakteh pautramakalmasham|
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥ ३॥	Paraasharaatmajam vande shukataatam taponidhim|| 3||
व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।	Vyaasaaya vishnuroopaaya vyaasaroopaaya vishnave |
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ॥ ४॥	Namo vai brahmanidhaye vaasishthaaya namo namah || 4||
अविकाराय शुद्धाय नित्याय परमात्मने ।	Avikaaraaya shuddhaaya nityaaya paramaatmane |
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे ॥ ५॥	Sadaikarooparoopaaya vishnave sarvajishnave || 5||
यस्य स्मरणमात्रेण जन्मसंसारबन्धनात्।	Yasya smaranamaatrena janmasamsaarabandhanaat|
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ॥ ६॥	Vimuchyate namastasmai vishnave prabhavishnave || 6||
नमः समस्तभूतानामादिभूताय भूभृते ।	Namah samastabhootaanaamaadibhootaaya bhoobhrite |
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥	Anekarooparoopaaya vishnave prabhavishnave ||
ॐ नमो विष्णवे प्रभविष्णवे ॥	Om namo vishnave prabhavishnave ||
श्रीवैशम्पायन उवाच —	Shreevaishampaayana uvaacha -
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।	Shrutvaa dharmaanasheshena paavanaani cha sarvashah |
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ ७॥	Yudhishthirah shaantanavam punarevaabhyabhaashata || 7||
युधिष्ठिर उवाच —	Yudhishthira uvaacha -

किमेकं दैवतं लोके किं वाप्येकं परायणम्।	Kimekam daivatam loke kim vaapyekam paraayanam|
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥ ८॥	Stuvantah kam kamarchantah praapnuyurmaanavaah shubham|| 8||
को धर्मः सर्वधर्माणां भवतः परमो मतः ।	Ko dharmah sarvadharmaanaam bhavatah paramo matah |
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्॥ ९॥	Kim japanmuchyate janturjanmasamsaarabandhanaat|| 9||
भीष्म उवाच —	Bheeshma uvaacha -
जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।	Jagatprabhum devadevamanantam purushottamam|
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ १०॥	Stuvannaamasahasrena purushah satatotthitah || 10||
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।	Tameva chaarchayannityam bhaktyaa purushamavyayam|
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ११॥	Dhyaayanstuvannamasyamshcha yajamaanastameva cha || 11||
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।	Anaadinidhanam vishnum sarvalokamaheshvaram|
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥ १२॥	Lokaadhyaksham stuvannityam sarvaduhkhaatigo bhavet|| 12||
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।	Brahmanyam sarvadharmajnyam lokaanaam keertivardhanam|
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥ १३॥	Lokanaatham mahadbhootam sarvabhootabhavodbhavam|| 13||
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।	Esha me sarvadharmaanaam dharmo'dhikatamo matah |
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ १४॥	Yadbhaktyaa pundareekaaksham stavairarchennarah sadaa || 14||
परमं यो महत्तेजः परमं यो महत्तपः ।	Paramam yo mahattejah paramam yo mahattapah |
परमं यो महद्ब्रह्म परमं यः परायणम्॥ १५॥	Paramam yo mahadbrahma paramam yah paraayanam|| 15||
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम्।	Pavitraanaam pavitram yo manggalaanaam cha manggalam|
दैवतं दैवतानां च भूतानां योऽव्ययः पिता ॥ १६॥	Daivatam daivataanaam cha bhootaanaam yo'vyayah pitaa || 16||
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।	Yatah sarvaani bhootaani bhavantyaadiyugaagame |
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ १७॥	Yasmimshcha pralayam yaanti punareva yugakshaye || 17||
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।	Tasya lokapradhaanasya jagannaathasya bhoopate |
विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥ १८॥	Vishnornaamasahasram me shrinu paapabhayaapaham|| 18||
यानि नामानि गौणानि विख्यातानि महात्मनः ।	Yaani naamaani gaunaani vikhyaataani mahaatmanah |

ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ॥ १९॥	Rishibhih parigeetaani taani vakshyaami bhootaye || 19||
ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।	Rishirnaamnaam sahasrasya vedavyaaso mahaamunih	
छन्दोऽनुष्टुप्तथा देवो भगवान्देवकीसुतः ॥ २०॥	Chhando'nushtuptathaa devo bhagavaandevakeesutah || 20||
अमृतांशूद्भवो बीजं शक्तिर्देवकीनन्दनः ।	Amritaamshoodbhavo beejam shaktirdevakeenandanah	
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियोज्यते ॥ २१॥	Trisaamaa hridayam tasya shaantyarthe viniyojyate || 21||
विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।	Vishnum jishnum mahaavishnum prabhavishnum maheshvaram|
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम्॥ २२॥	Anekaroopadaityaantam namaami purushottamam|| 22||
पूर्वन्यासः	Poorvanyaasah
श्रीवेदव्यास उवाच —	Shreevedavyaasa uvaacha -
ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य ।	Om asya shreevishnordivyasahasranaamastotramahaamantrasya	
श्रीवेदव्यासो भगवान्ऋषिः ।	Shreevedavyaaso bhagavaanrishih	
अनुष्टुप्छन्दः ।	Anushtupchhandah	
श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता ।	Shreemahaavishnuh paramaatmaa shreemannaaraayano devataa	
अमृतांशूद्भवो भानुरिति बीजम्।	Amritaamshoodbhavo bhaanuriti beejam|
देवकीनन्दनः स्रष्टेति शक्तिः ।	Devakeenandanah srashteti shaktih	
उद्भवः क्षोभणो देव इति परमो मन्त्रः ।	Udbhavah kshobhano deva iti paramo mantrah	
शङ्खभृन्नन्दकी चक्रीति कीलकम्।	Shangkhabhrinnandakee chakreeti keelakam|
शार्ङ्गधन्वा गदाधर इत्यस्त्रम्।	Shaarnggadhanvaa gadaadhara ityastram|
रथाङ्गपाणिरक्षोभ्य इति नेत्रम्।	Rathaanggapaanirakshobhya iti netram|
त्रिसामा सामगः सामेति कवचम्।	Trisaamaa saamagah saameti kavacham|
आनन्दं परब्रह्मेति योनिः ।	Aanandam parabrahmeti yonih	
ऋतुः सुदर्शनः काल इति दिग्बन्धः ।	Rituh sudarshanah kaala iti digbandhah	
श्रीविश्वरूप इति ध्यानम्।	Shreevishvaroopa iti dhyaanam|
श्रीमहाविष्णुप्रीत्यर्थे सहस्रनामस्तोत्रपाठे विनियोगः ॥	Shreemahaavishnupreetyarthe sahasranaamastotrapaathe viniyogah ||
अथ न्यासः ।	Atha nyaasah	
ॐ शिरसि वेदव्यासर्षये नमः ।	Om shirasi vedavyaasarshaye namah	
मुखे अनुष्टुप्छन्दसे नमः ।	Mukhe anushtupchhandase namah	

हृदि श्रीकृष्णपरमात्मदेवतायै नमः ।	Hridi shreekrishnaparamaatmadevataayai namah |
गुह्ये अमृतांशूद्भवो भानुरिति बीजाय नमः ।	Guhye amritaamshoodbhavo bhaanuriti beejaaya namah |
पादयोर्देवकीनन्दनः स्रष्टेति शक्तये नमः ।	Paadayordevakeenandanah srashteti shaktaye namah |
सर्वाङ्गे शङ्खभृन्नन्दकी चक्रीति कीलकाय नमः ।	Sarvaangge shangkhabhrinnandakee chakreeti keelakaaya namah |
करसम्पूटे मम श्रीकृष्णप्रीत्यर्थे जपे विनियोगः ॥	Karasampoote mama shreekrishnapreetyarthe jape viniyogah ||
इति ऋष्यादिन्यासः ॥	Iti rishyaadinyaasah ||
अथ करन्यासः ।	Atha karanyaasah |
ॐ विश्वं विष्णुर्वषट्कार इत्यङ्गुष्ठाभ्यां नमः ।	Om vishvam vishnurvashatkaara ityanggushthaabhyaam namah |
अमृतांशूद्भवो भानुरिति तर्जनीभ्यां नमः ।	Amritaamshoodbhavo bhaanuriti tarjaneebhyaam namah |
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति मध्यमाभ्यां नमः ।	Brahmanyo brahmakridbrahmeti madhyamaabhyaam namah |
सुवर्णबिन्दुरक्षोभ्य इत्यनामिकाभ्यां नमः ।	Suvarnabindurakshobhya ityanaamikaabhyaam namah |
निमिषोऽनिमिषः स्रग्वीति कनिष्ठिकाभ्यां नमः ।	Nimisho'nimishah sragveeti kanishthikaabhyaam namah |
रथाङ्गपाणिरक्षोभ्य इति करतलकरपृष्ठाभ्यां नमः ।	Rathaanggapaanirakshobhya iti karatalakaraprishthaabhyaam namah |
इति करन्यासः ॥	Iti karanyaasah ||
अथ षडङ्गन्यासः ।	Atha shadangganyaasah |
ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय नमः ।	Om vishvam vishnurvashatkaara iti hridayaaya namah |
अमृतांशूद्भवो भानुरिति शिरसे स्वाहा ।	Amritaamshoodbhavo bhaanuriti shirase svaahaa |
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति शिखायै वषट्।	Brahmanyo brahmakridbrahmeti shikhaayai vashat|
सुवर्णबिन्दुरक्षोभ्य इति कवचाय हुम्।	Suvarnabindurakshobhya iti kavachaaya hum|
निमिषोऽनिमिषः स्रग्वीति नेत्रत्रयाय वौषट्।	Nimisho'nimishah sragveeti netratrayaaya vaushat|
रथाङ्गपाणिरक्षोभ्य इत्यस्त्राय फट्।	Rathaanggapaanirakshobhya ityastraaya phat|
इति षडङ्गन्यासः ॥	Iti shadangganyaasah ||
श्रीकृष्णप्रीत्यर्थे विष्णोर्दिव्यसहस्रनामजपमहं	Shreekrishnapreetyarthe vishnordivyasahasranaamajapamaham
करिष्ये इति सङ्कल्पः ।	Karishye iti sangkalpah |
अथ ध्यानम्।	Atha dhyaanam|
क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां	Ksheerodanvatpradeshe shuchimanivilasatsaikate mauktikaanaam

मालाकॢप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः । शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षै- रानन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः ॥ १॥	Maalaaklriptaasanasthah sphatikamaninibhairmauktikairmanditaanggah | Shubhrairabhrairadabhrairuparivirachitairmuktapeeyooshavarshai- Raanandee nah puneeyaadarinalinagadaashangkhapaanirmukundah || 1||
भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे	Bhooh paadau yasya naabhirviyadasuranilashchandrasooryau cha netre
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः ।	Karnaavaashaah shiro dyaurmukhamapi dahano yasya vaasteyamabdhih |
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः	Antahstham yasya vishvam suranarakhagagobhogigandharvadaityaih
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि ॥ २॥	Chitram ramramyate tam tribhuvanavapusham vishnumeesham namaami || 2||
ॐ नमो भगवते वासुदेवाय ॥	Om namo bhagavate vaasudevaaya ||
ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं	Om shaantaakaaram bhujagashayanam padmanaabham suresham
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।	Vishvaadhaaram gaganasadrisham meghavarnam shubhaanggam|
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं	Lakshmeekaantam kamalanayanam yogibhirdhyaanagamyam
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥ ३॥	Vande vishnum bhavabhayaharam sarvalokaikanaatham|| 3||
मेघश्यामं पीतकौशेयवासं	Meghashyaamam peetakausheyavaasam
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम्।	Shreevatsaangkam kaustubhodbhaasitaanggam|
पुण्योपेतं पुण्डरीकायताक्षं	Punyopetam pundareekaayataaksham
विष्णुं वन्दे सर्वलोकैकनाथम्॥ ४॥	Vishnum vande sarvalokaikanaatham|| 4||
नमः समस्तभूतानामादिभूताय भूभृते ।	Namah samastabhootaanaamaadibhootaaya bhoobhrite |
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ॥ ५॥	Anekarooparoopaaya vishnave prabhavishnave || 5||
सशङ्खचक्रं सकिरीटकुण्डलं	Sashangkhachakram sakireetakundalam
सपीतवस्त्रं सरसीरुहेक्षणम्।	Sapeetavastram saraseeruhekshanam|
सहारवक्षःस्थलकौस्तुभश्रियं	Sahaaravakshahsthalakaustubhashriyam
नमामि विष्णुं शिरसा चतुर्भुजम्॥ ६॥	Namaami vishnum shirasaa chaturbhujam|| 6||
छायायां पारिजातस्य हेमसिंहासनोपरि	Chhaayaayaam paarijaatasya hemasimhaasanopari
आसीनमम्बुदश्याममायताक्षमलंकृतम्।	Aaseenamambudashyaamamaayataakshamalamkritam|
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसं	Chandraananam chaturbaahum shreevatsaangkitavakshasam
रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये ॥ ७॥	Rukmineesatyabhaamaabhyaam sahitam krishnamaashraye || 7||

स्तोत्रम्	Stotram
हरिः ॐ ।	Harih Om |
ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।	Om vishvam vishnurvashatkaaro bhootabhavyabhavatprabhuh |
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ॥ १॥	Bhootakridbhootabhridbhaavo bhootaatmaa bhootabhaavanah || 1||
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।	Pootaatmaa paramaatmaa cha muktaanaam paramaa gatih |
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥ २॥	Avyayah purushah saakshee kshetrajnyo'kshara eva cha || 2||
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।	Yogo yogavidaam netaa pradhaanapurusheshvarah |
नारसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ ३॥	Naarasimhavapuh shreemaankeshavah purushottamah || 3||
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।	Sarvah sharvah shivah sthaanurbhootaadirnidhiravyayah |
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ॥ ४॥	Sambhavo bhaavano bhartaa prabhavah prabhureeshvarah || 4||
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।	Svayambhooh shambhuraadityah pushkaraaksho mahaasvanah |
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥ ५॥	Anaadinidhano dhaataa vidhaataa dhaaturuttamah || 5||
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।	Aprameyo hrisheekeshah padmanaabho'maraprabhuh |
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥ ६॥	Vishvakarmaa manustvashtaa sthavishthah sthaviro dhruvah || 6||
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।	Agraahyah shaashvatah krishno lohitaakshah pratardanah |
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम्॥ ७॥	Prabhootastrikakubdhaama pavitram manggalam param|| 7||
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।	Eeshaanah praanadah praano jyeshthah shreshthah prajaapatih |
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ ८॥	Hiranyagarbho bhoogarbho maadhavo madhusoodanah || 8||
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।	Eeshvaro vikramee dhanvee medhaavee vikramah kramah |
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥ ९॥	Anuttamo duraadharshah kritajnyah kritiraatmavaan|| 9||
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।	Sureshah sharanam sharma vishvaretaah prajaabhavah |
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ॥ १०॥	Ahah samvatsaro vyaalah pratyayah sarvadarshanah || 10||
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।	Ajah sarveshvarah siddhah siddhih sarvaadirachyutah |

वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ॥ ११॥	Vrishaakapirameyaatmaa sarvayogavinihsritah || 11||
वसुर्वसुमनाः सत्यः समात्माऽसम्मितः समः ।	Vasurvasumanaah satyah samaatmaa'sammitah samah	
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥ १२॥	Amoghah pundareekaaksho vrishakarmaa vrishaakritih || 12||
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।	Rudro bahushiraa babhrurvishvayonih shuchishravaah	
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ॥ १३॥	Amritah shaashvatasthaanurvaraaroho mahaatapaah || 13||
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।	Sarvagah sarvavidbhaanurvishvakseno janaardanah	
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ॥ १४॥	Vedo vedavidavyanggo vedaanggo vedavitkavih || 14||
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।	Lokaadhyakshah suraadhyaksho dharmaadhyakshah kritaakritah	
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५॥	Chaturaatmaa chaturvyoohashchaturdamshtrashchaturbhujah || 15||
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।	Bhraajishnurbhojanam bhoktaa sahishnurjagadaadijah	
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ॥ १६॥	Anagho vijayo jetaa vishvayonih punarvasuh || 16||
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।	Upendro vaamanah praamshuramoghah shuchiroorjitah	
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः ॥ १७॥	Ateendrah sanggrahah sargo dhritaatmaa niyamo yamah || 17||
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।	Vedyo vaidyah sadaayogee veerahaa maadhavo madhuh	
अतीन्द्रियो महामायो महोत्साहो महाबलः ॥ १८॥	Ateendriyo mahaamaayo mahotsaaho mahaabalah || 18||
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।	Mahaabuddhirmahaaveeryo mahaashaktirmahaadyutih	
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ॥ १९॥	Anirdeshyavapuh shreemaanameyaatmaa mahaadridhrik || 19||
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।	Maheshvaaso maheebhartaa shreenivaasah sataam gatih	
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः ॥ २०॥	Aniruddhah suraanando govindo govidaam patih || 20||
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।	Mareechirdamano hamsah suparno bhujagottamah	
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ॥ २१॥	Hiranyanaabhah sutapaah padmanaabhah prajaapatih || 21||
अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान्स्थिरः ।	Amrityuh sarvadrik simhah sandhaataa sandhimaansthirah	

अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ॥ २२॥	Ajo durmarshanah shaastaa vishrutaatmaa suraarihaa || 22||
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।	Gururgurutamo dhaama satyah satyaparaakramah |
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥ २३॥	Nimisho'nimishah sragvee vaachaspatirudaaradheeh || 23||
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।	Agraneergraamaneeh shreemaannyaayo netaa sameeranah |
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥ २४॥	Sahasramoordhaa vishvaatmaa sahasraakshah sahasrapaat|| 24||
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।	Aavartano nivrittaatmaa samvritah sampramardanah |
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ २५॥	Ahah samvartako vahniranilo dharaneedharah || 25||
सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः ।	Suprasaadah prasannaatmaa vishvadhrigvishvabhugvibhuh |
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ॥ २६॥	Satkartaa satkritah saadhurjahnurnaaraayano narah || 26||
असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः ।	Asangkhyeyo'prameyaatmaa vishishtah shishtakrichchhuchih |
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः ॥ २७॥	Siddhaarthah siddhasangkalpah siddhidah siddhisaadhanah || 27||
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।	Vrishaahee vrishabho vishnurvrishaparvaa vrishodarah |
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ॥ २८॥	Vardhano vardhamaanashcha viviktah shrutisaagarah || 28||
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।	Subhujo durdharo vaagmee mahendro vasudo vasuh |
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ २९॥	Naikaroopo brihadroopah shipivishtah prakaashanah || 29||
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।	Ojastejodyutidharah prakaashaatmaa prataapanah |
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ॥ ३०॥	Riddhah spashtaaksharo mantrashchandraamshurbhaaskaradyutih || 30||
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।	Amritaamshoodbhavo bhaanuh shashabinduh sureshvarah |
औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥ ३१॥	Aushadham jagatah setuh satyadharmaparaakramah || 31||
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।	Bhootabhavyabhavannaathah pavanah paavano'nalah |
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः ॥ ३२॥	Kaamahaa kaamakritkaantah kaamah kaamapradah prabhuh || 32||
युगादिकृद्युगावर्तो नैकमायो महाशनः ।	Yugaadikridyugaavarto naikamaayo mahaashanah |

अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्॥ ३३॥	Adrishyo vyaktaroopashcha sahasrajidanantajit|| 33||
इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ।	Ishto'vishishtah shishteshtah shikhandee nahusho vrishah |
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ॥ ३४॥	Krodhahaa krodhakritkartaa vishvabaahurmaheedharah || 34||
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः ।	Achyutah prathitah praanah praanado vaasavaanujah |
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३५॥	Apaamnidhiradhishthaanamapramattah pratishthitah || 35||
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।	Skandah skandadharo dhuryo varado vaayuvaahanah |
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ॥ ३६॥	Vaasudevo brihadbhaanuraadidevah purandarah || 36||
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।	Ashokastaaranastaarah shoorah shaurirjaneshvarah |
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ३७॥	Anukoolah shataavartah padmee padmanibhekshanah || 37||
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।	Padmanaabho'ravindaakshah padmagarbhah shareerabhrit|
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः ॥ ३८॥	Maharddhirriddho vriddhaatmaa mahaaksho garudadhvajah || 38||
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।	Atulah sharabho bheemah samayajnyo havirharih |
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः ॥ ३९॥	Sarvalakshanalakshanyo lakshmeevaansamitinyjayah || 39||
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।	Viksharo rohito maargo heturdaamodarah sahah |
महीधरो महाभागो वेगवानमिताशनः ॥ ४०॥	Maheedharo mahaabhaago vegavaanamitaashanah || 40||
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।	Udbhavah kshobhano devah shreegarbhah parameshvarah |
करणं कारणं कर्ता विकर्ता गहनो गुहः ॥ ४१॥	Karanam kaaranam kartaa vikartaa gahano guhah || 41||
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः ।	Vyavasaayo vyavasthaanah samsthaanah sthaanado dhruvah |
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ४२॥	Pararddhih paramaspashtastushtah pushtah shubhekshanah || 42||
रामो विरामो विरजो मार्गो नेयो नयोऽनयः ।	Raamo viraamo virajo maargo neyo nayo'nayah |
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ॥ ४३॥	Veerah shaktimataam shreshtho dharmo dharmaviduttamah || 43||
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।	Vaikunthah purushah praanah praanadah pranavah prithuh |
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ॥ ४४॥	Hiranyagarbhah shatrughno vyaapto vaayuradhokshajah || 44||

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।	Rituh sudarshanah kaalah parameshthee parigrahah |
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ॥ ४५॥	Ugrah samvatsaro daksho vishraamo vishvadakshinah || 45||
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।	Vistaarah sthaavarasthaanuh pramaanam beejamavyayam|
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ॥ ४६॥	Artho'nartho mahaakosho mahaabhogo mahaadhanah || 46||
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः ।	Anirvinnah sthavishtho'bhoordharmayoopo mahaamakhah |
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ॥ ४७॥	Nakshatranemirnakshatree kshamah kshaamah sameehanah || 47||
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।	Yajnya ijyo mahejyashcha kratuh satram sataam gatih |
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥ ४८॥	Sarvadarshee vimuktaatmaa sarvajnyo jnyaanamuttamam|| 48||
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।	Suvratah sumukhah sookshmah sughoshah sukhadah suhrit|
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥ ४९॥	Manoharo jitakrodho veerabaahurvidaaranah || 49||
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।	Svaapanah svavasho vyaapee naikaatmaa naikakarmakrit|
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥ ५०॥	Vatsaro vatsalo vatsee ratnagarbho dhaneshvarah || 50||
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम्।	Dharmagubdharmakriddharmee sadasatksharamaksharam|
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ॥ ५१॥	Avijnyaataa sahasraamshurvidhaataa kritalakshanah || 51||
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।	Gabhastinemih sattvasthah simho bhootamaheshvarah |
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ५२॥	Aadidevo mahaadevo devesho devabhridguruh || 52||
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।	Uttaro gopatirgoptaa jnyaanagamyah puraatanah |
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः ॥ ५३॥	Shareerabhootabhridbhoktaa kapeendro bhooridakshinah || 53||
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।	Somapo'mritapah somah purujitpurusattamah |
विनयो जयः सत्यसन्धो दाशार्हः सात्वताम्पतिः ॥ ५४॥ विनियोज्यः	Vinayo jayah satyasandho daashaarhah saatvataampatih || 54|| viniyojyah
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः ।	Jeevo vinayitaa saakshee mukundo'mitavikramah |
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ॥ ५५॥	Ambhonidhiranantaatmaa mahodadhishayo'ntakah || 55||

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः ।	Ajo mahaarhah svaabhaavyo jitaamitrah pramodanah	
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः ॥ ५६॥	Aanando nandano nandah satyadharmaa trivikramah || 56||
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।	Maharshih kapilaachaaryah kritajnyo medineepatih	
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्॥ ५७॥	Tripadastridashaadhyaksho mahaashringgah kritaantakrit|| 57||
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।	Mahaavaraaho govindah sushenah kanakaanggadee	
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ५८॥	Guhyo gabheero gahano guptashchakragadaadharah || 58||
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः ।	Vedhaah svaanggo'jitah krishno dridhah sangkarshano'chyutah	
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ॥ ५९॥	Varuno vaaruno vrikshah pushkaraaksho mahaamanaah || 59||
भगवान्भगहाऽऽनन्दी वनमाली हलायुधः ।	Bhagavaanbhagahaa"nandee vanamaalee halaayudhah	
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः ॥ ६०॥	Aadityo jyotiraadityah sahishnurgatisattamah || 60||
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।	Sudhanvaa khandaparashurdaaruno dravinapradah	
दिवस्पृक् सर्वदृग्व्यासो वाचस्पतिरयोनिजः ॥ ६१॥	Divasprik sarvadrigvyaaso vaachaspatirayonijah || 61||
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।	Trisaamaa saamagah saama nirvaanam bheshajam bhishak	
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्॥ ६२॥	Samnyaasakrichchhamah shaanto nishthaa shaantih paraayanam|| 62||
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।	Shubhaanggah shaantidah srashtaa kumudah kuvaleshayah	
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६३॥	Gohito gopatirgoptaa vrishabhaaksho vrishapriyah || 63||
अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः ।	Anivartee nivrittaatmaa sangksheptaa kshemakrichchhivah	
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतांवरः ॥ ६४॥	Shreevatsavakshaah shreevaasah shreepatih shreemataamvarah || 64||
श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः ।	Shreedah shreeshah shreenivaasah shreenidhih shreevibhaavanah	
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ॥ ६५॥	Shreedharah shreekarah shreyah shreemaanllokatrayaashrayah || 65||
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ।	Svakshah svanggah shataanando nandirjyotirganeshvarah	

विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः ॥ ६६॥	Vijitaatmaa'vidheyaatmaa satkeertishchhinnasamshayah || 66||
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः ।	Udeernah sarvatashchakshuraneeshah shaashvatasthirah |
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥ ६७॥	Bhooshayo bhooshano bhootirvishokah shokanaashanah || 67||
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः ।	Archishmaanarchitah kumbho vishuddhaatmaa vishodhanah |
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥ ६८॥	Aniruddho'pratirathah pradyumno'mitavikramah || 68||
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।	Kaalaneminihaa veerah shaurih shoorajaneshvarah |
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ॥ ६९॥	Trilokaatmaa trilokeshah keshavah keshihaa harih || 69||
कामदेवः कामपालः कामी कान्तः कृतागमः ।	Kaamadevah kaamapaalah kaamee kaantah kritaagamah |
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥ ७०॥	Anirdeshyavapurvishnurveero'nanto dhananyjayah || 70||
ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।	Brahmanyo brahmakrid brahmaa brahma brahmavivardhanah |
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७१॥	Brahmavid braahmano brahmee brahmajnyo braahmanapriyah || 71||
महाक्रमो महाकर्मा महातेजा महोरगः ।	Mahaakramo mahaakarmaa mahaatejaa mahoragah |
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ७२॥	Mahaakraturmahaayajvaa mahaayajnyo mahaahavih || 72||
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ।	Stavyah stavapriyah stotram stutih stotaa ranapriyah |
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७३॥	Poornah poorayitaa punyah punyakeertiranaamayah || 73||
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।	Manojavasteerthakaro vasuretaa vasupradah |
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ७४॥	Vasuprado vaasudevo vasurvasumanaa havih || 74||
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः ।	Sadgatih satkritih sattaa sadbhootih satparaayanah |
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ७५॥	Shooraseno yadushreshthah sannivaasah suyaamunah || 75||
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।	Bhootaavaaso vaasudevah sarvaasunilayo'nalah |
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ७६॥	Darpahaa darpado dripto durdharo'thaaparaajitah || 76||
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्।	Vishvamoortirmahaamoortirdeeptamoortiramoortimaan|

अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ७७॥	Anekamoortiravyaktah shatamoortih shataananah || 77||
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।	Eko naikah savah kah kim yattatpadamanuttamam|
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ॥ ७८॥	Lokabandhurlokanaatho maadhavo bhaktavatsalah || 78||
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।	Suvarnavarno hemaanggo varaanggashchandanaanggadee	
वीरहा विषमः शून्यो घृताशीरचलश्चलः ॥ ७९॥	Veerahaa vishamah shoonyo ghritaasheerachalashchalah || 79||
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक् ।	Amaanee maanado maanyo lokasvaamee trilokadhrik	
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ॥ ८०॥	Sumedhaa medhajo dhanyah satyamedhaa dharaadharah || 80||
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।	Tejovrisho dyutidharah sarvashastrabhritaam varah	
प्रग्रहो निग्रहो व्यग्रो नैकश्रृङ्गो गदाग्रजः ॥ ८१॥	Pragraho nigraho vyagro naikashringgo gadaagrajah || 81||
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।	Chaturmoortishchaturbaahushchaturvyoohashchaturgatih	
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥ ८२॥	Chaturaatmaa chaturbhaavashchaturvedavidekapaat|| 82||
समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः ।	Samaavarto'nivrittaatmaa durjayo duratikramah	
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥ ८३॥	Durlabho durgamo durgo duraavaaso duraarihaa || 83||
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।	Shubhaanggo lokasaaranggah sutantustantuvardhanah	
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ८४॥	Indrakarmaa mahaakarmaa kritakarmaa kritaagamah || 84||
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।	Udbhavah sundarah sundo ratnanaabhah sulochanah	
अर्को वाजसनः श्रृङ्गी जयन्तः सर्वविज्जयी ॥ ८५॥	Arko vaajasanah shringgee jayantah sarvavijjayee || 85||
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।	Suvarnabindurakshobhyah sarvavaageeshvareshvarah	
महाह्रदो महागर्तो महाभूतो महानिधिः ॥ ८६॥	Mahaahrado mahaagarto mahaabhooto mahaanidhih || 86||
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः ।	Kumudah kundarah kundah parjanyah paavano'nilah	
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥ ८७॥	Amritaasho'mritavapuh sarvajnyah sarvatomukhah || 87||
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।	Sulabhah suvratah siddhah shatrujichchhatrutaapanah	

न्यग्रोधोऽदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥ ८८॥	Nyagrodho'dumbaro'shvatthashchaanooraandhranishoodanah || 88||
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।	Sahasraarchih saptajihvah saptaidhaah saptavaahanah |
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ ८९॥	Amoortiranagho'chintyo bhayakridbhayanaashanah || 89||
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्।	Anurbrihatkrishah sthoolo gunabhrinnirguno mahaan|
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ॥ ९०॥	Adhritah svadhritah svaasyah praagvamsho vamshavardhanah || 90||
भारभृत्कथितो योगी योगीशः सर्वकामदः ।	Bhaarabhritkathito yogee yogeeshah sarvakaamadah |
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ॥ ९१॥	Aashramah shramanah kshaamah suparno vaayuvaahanah || 91||
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।	Dhanurdharo dhanurvedo dando damayitaa damah |
अपराजितः सर्वसहो नियन्ताऽनियमोऽयमः ॥ ९२॥	Aparaajitah sarvasaho niyantaa'niyamo'yamah || 92||
सत्त्ववान्सात्त्विकः सत्यः सत्यधर्मपरायणः ।	Sattvavaansaattvikah satyah satyadharmaparaayanah |
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ॥ ९३॥	Abhipraayah priyaarho'rhah priyakritpreetivardhanah || 93||
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।	Vihaayasagatirjyotih suruchirhutabhugvibhuh |
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥ ९४॥	Ravirvirochanah sooryah savitaa ravilochanah || 94||
अनन्तो हुतभुग्भोक्ता सुखदो नैकजोऽग्रजः ।	Ananto hutabhugbhoktaa sukhado naikajo'grajah |
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ॥ ९५॥	Anirvinnah sadaamarshee lokaadhishthaanamadbhutah || 95||
सनात्सनातनतमः कपिलः कपिरव्ययः ।	Sanaatsanaatanatamah kapilah kapiravyayah |
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः ॥ ९६॥	Svastidah svastikritsvasti svastibhuksvastidakshinah || 96||
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।	Araudrah kundalee chakree vikramyoorjitashaasanah |
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥ ९७॥	Shabdaatigah shabdasahah shishirah sharvareekarah || 97||
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणांवरः ।	Akroorah peshalo daksho dakshinah kshaminaamvarah |
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ९८॥	Vidvattamo veetabhayah punyashravanakeertanah || 98||
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ।	Uttaarano dushkritihaa punyo duhsvapnanaashanah |

वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः ॥ ९९॥	Veerahaa rakshanah santo jeevanah paryavasthitah || 99||
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।	Anantaroopo'nantashreerjitamanyurbhayaapahah |
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः ॥ १००॥	Chaturashro gabheeraatmaa vidisho vyaadisho dishah || 100||
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।	Anaadirbhoorbhuvo lakshmeeh suveero ruchiraanggadah |
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १०१॥	Janano janajanmaadirbheemo bheemaparaakramah || 101||
आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।	Aadhaaranilayo'dhaataa pushpahaasah prajaagarah |
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः ॥ १०२॥	Oordhvagah satpathaachaarah praanadah pranavah panah || 102||
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।	Pramaanam praananilayah praanabhritpraanajeevanah |
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥ १०३॥	Tattvam tattvavidekaatmaa janmamrityujaraatigah || 103||
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।	Bhoorbhuvahsvastarustaarah savitaa prapitaamahah |
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १०४॥	Yajnyo yajnyapatiryajvaa yajnyaanggo yajnyavaahanah || 104||
यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग्यज्ञसाधनः ।	Yajnyabhrid yajnyakrid yajnyee yajnyabhugyajnyasaadhanah |
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ॥ १०५॥	Yajnyaantakrid yajnyaguhyamannamannaada eva cha || 105||
आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः ।	Aatmayonih svayanyjaato vaikhaanah saamagaayanah |
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥ १०६॥	Devakeenandanah srashtaa kshiteeshah paapanaashanah || 106||
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।	Shangkhabhrinnandakee chakree shaarnggadhanvaa gadaadharah |
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ १०७॥	Rathaanggapaanirakshobhyah sarvapraharanaayudhah || 107||
सर्वप्रहरणायुध ॐ नम इति ।	Sarvapraharanaayudha Om nama iti |
वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी ।	Vanamaalee gadee shaarnggee shangkhee chakree cha nandakee |
श्रीमान्नारायणो विष्णुर्वासुदेवोऽभिरक्षतु ॥ १०८॥	Shreemaannaaraayano vishnurvaasudevo'bhirakshatu || 108||
श्रीवासुदेवोऽभिरक्षतु ॐ नम इति ।	Shreevaasudevo'bhirakshatu Om nama iti |
उत्तरन्यासः, फलश्रुतिः	Uttaranyaasah, phalashrutih
भीष्म उवाच —	Bheeshma uvaacha -

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।	Iteedam keertaneeyasya keshavasya mahaatmanah |
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥ १॥	Naamnaam sahasram divyaanaamasheshena prakeertitam|| 1||
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।	Ya idam shrinuyaannityam yashchaapi parikeertayet|
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः ॥ २॥	Naashubham praapnuyaatkinychitso'mutreha cha maanavah || 2||
वेदान्तगो ब्राह्मणः स्यात्क्षत्रियो विजयी भवेत्।	Vedaantago braahmanah syaatkshatriyo vijayee bhavet|
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥ ३॥	Vaishyo dhanasamriddhah syaachchhoodrah sukhamavaapnuyaat|| 3||
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।	Dharmaarthee praapnuyaaddharmamarthaarthee chaarthamaapnuyaat|
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजाम्॥ ४॥	Kaamaanavaapnuyaatkaamee prajaarthee praapnuyaatprajaam|| 4||
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।	Bhaktimaanyah sadotthaaya shuchistadgatamaanasah |
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत्॥ ५॥	Sahasram vaasudevasya naamnaametatprakeertayet|| 5||
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।	Yashah praapnoti vipulam jnyaatipraadhaanyameva cha |
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्॥ ६॥	Achalaam shriyamaapnoti shreyah praapnotyanuttamam|| 6||
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।	Na bhayam kvachidaapnoti veeryam tejashcha vindati |
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ ७॥	Bhavatyarogo dyutimaanbalaroopagunaanvitah || 7||
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्।	Rogaarto muchyate rogaadbaddho muchyeta bandhanaat|
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥ ८॥	Bhayaanmuchyeta bheetastu muchyetaapanna aapadah || 8||
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्।	Durgaanyatitaratyaashu purushah purushottamam|
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥ ९॥	Stuvannaamasahasrena nityam bhaktisamanvitah || 9||
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।	Vaasudevaashrayo martyo vaasudevaparaayanah |
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥ १०॥	Sarvapaapavishuddhaatmaa yaati brahma sanaatanam|| 10||
न वासुदेवभक्तानामशुभं विद्यते क्वचित्।	Na vaasudevabhaktaanaamashubham vidyate kvachit|
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ११॥	Janmamrityujaraavyaadhibhayam naivopajaayate || 11||
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।	Imam stavamadheeyaanah shraddhaabhaktisamanvitah |

युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ॥ १२॥	Yujyetaatmasukhakshaantishreedhritismritikeertibhih || 12||
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।	Na krodho na cha maatsaryam na lobho naashubhaa matih	
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ॥ १३॥	Bhavanti kritapunyaanaam bhaktaanaam purushottame || 13||
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।	Dyauh sachandraarkanakshatraa kham disho bhoormahodadhih	
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ १४॥	Vaasudevasya veeryena vidhritaani mahaatmanah || 14||
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।	Sasuraasuragandharvam sayakshoragaraakshasam|
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्॥ १५॥	Jagadvashe vartatedam krishnasya sacharaacharam|| 15||
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।	Indriyaani mano buddhih sattvam tejo balam dhritih	
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥ १६॥	Vaasudevaatmakaanyaahuh kshetram kshetrajnya eva cha || 16||
सर्वागमानामाचारः प्रथमं परिकल्प्यते ।	Sarvaagamaanaamaachaarah prathamam parikalpyate	
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥ १७॥	Aachaaraprabhavo dharmo dharmasya prabhurachyutah || 17||
ऋषयः पितरो देवा महाभूतानि धातवः ।	Rishayah pitaro devaa mahaabhootaani dhaatavah	
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम्॥ १८॥	Janggamaajanggamam chedam jagannaaraayanodbhavam|| 18||
योगो ज्ञानं तथा साङ्ख्यं विद्याः शिल्पादिकर्म च ।	Yogo jnyaanam tathaa saangkhyam vidyaah shilpaadikarma cha	
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥ १९॥	Vedaah shaastraani vijnyaanametatsarvam janaardanaat|| 19||
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।	Eko vishnurmahadbhootam prithagbhootaanyanekashah	
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः ॥ २०॥	Treemllokaanvyaapya bhootaatmaa bhungkte vishvabhugavyayah || 20||
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।	Imam stavam bhagavato vishnorvyaasena keertitam|
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥ २१॥	Pathedya ichchhetpurushah shreyah praaptum sukhaani cha || 21||
विश्वेश्वरमजं देवं जगतः प्रभुमव्ययम्।	Vishveshvaramajam devam jagatah prabhumavyayam|
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्॥ २२॥	Bhajanti ye pushkaraaksham na te yaanti paraabhavam|| 22||
न ते यान्ति पराभवम्ॐ नम इति ।	Na te yaanti paraabhavamom nama iti	
अर्जुन उवाच —	Arjuna uvaacha -

पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम ।	Padmapatravishaalaaksha padmanaabha surottama |
भक्तानामनुरक्तानां त्राता भव जनार्दन ॥ २३॥	Bhaktaanaamanuraktaanaam traataa bhava janaardana || 23||
श्रीभगवानुवाच —	Shreebhagavaanuvaacha -
यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव ।	Yo maam naamasahasrena stotumichchhati paandava |
सोहऽमेकेन श्लोकेन स्तुत एव न संशयः ॥ २४॥	Soha'mekena shlokena stuta eva na samshayah || 24||
स्तुत एव न संशय ॐ नम इति ।	Stuta eva na samshaya Om nama iti |
व्यास उवाच —	Vyaasa uvaacha -
वासनाद्वासुदेवस्य वासितं भुवनत्रयम्।	Vaasanaadvaasudevasya vaasitam bhuvanatrayam|
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥ २५॥	Sarvabhootanivaaso'si vaasudeva namo'stu te || 25||
श्रीवासुदेव नमोऽस्तु त ॐ नम इति ।	Shreevaasudeva namo'stu ta Om nama iti |
पार्वत्युवाच —	Paarvatyuvaacha -
केनोपायेन लघुना विष्णोर्नामसहस्रकम्।	Kenopaayena laghunaa vishnornaamasahasrakam|
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो ॥ २६॥	Pathyate panditairnityam shrotumichchhaamyaham prabho || 26||
ईश्वर उवाच —	Eeshvara uvaacha -
श्रीरामरामरामेति रमे रामे मनोरमे ।	Shreeraamaraamaraameti rame raame manorame |
सहस्रनामतत्तुल्यं रामनाम वरानने ॥ २७॥	Sahasranaamatattulyam raamanaama varaanane || 27||
श्रीरामनाम वरानन ॐ नम इति ।	Shreeraamanaama varaanana Om nama iti |
ब्रह्मोवाच —	Brahmovaacha -
नमोऽस्त्वनन्ताय सहस्रमूर्तये	Namo'stvanantaaya sahasramoortaye
सहस्रपादाक्षिशिरोरुबाहवे ।	Sahasrapaadaakshishirorubaahave |
सहस्रनाम्ने पुरुषाय शाश्वते	Sahasranaamne purushaaya shaashvate
सहस्रकोटियुगधारिणे नमः ॥ २८॥	Sahasrakotiyugadhaarine namah || 28||
सहस्रकोटियुगधारिणे नम ॐ नम इति ।	Sahasrakotiyugadhaarine nama Om nama iti |
ॐ तत्सदिति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यामानुशासनिके	Om tatsaditi shreemahaabhaarate shatasaahasryaam samhitaayaam vaiyaasikyaamaanushaasanike
पर्वणि भीष्मयुधिष्ठिरसंवादे श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रम्॥	Parvani bheeshmayudhishthirasamvaade shreevishnordivyasahasranaamastotram||
सञ्जय उवाच —	Sanyjaya uvaacha -
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।	Yatra yogeshvarah krishno yatra paartho dhanurdharah |
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ २९॥	Tatra shreervijayo bhootirdhruvaa neetirmatirmama || 29||

श्रीभगवानुवाच —	Shreebhagavaanuvaacha -
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।	Ananyaashchintayanto maam ye janaah paryupaasate |
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ ३०॥	Teshaam nityaabhiyuktaanaam yogakshemam vahaamyaham|| 30||
परित्राणाय साधूनां विनाशाय च दुष्कृताम्।	Paritraanaaya saadhoonaam vinaashaaya cha dushkritaam|
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥ ३१॥	Dharmasamsthaapanaarthaaya sambhavaami yuge yuge || 31||
आर्ता विषण्णाः शिथिलाश्च भीता घोरेषु च व्याधिषु वर्तमानाः ।	Aartaa vishannaah shithilaashcha bheetaa ghoreshu cha vyaadhishu vartamaanaah |
सङ्कीर्त्य नारायणशब्दमात्रं विमुक्तदुःखाः सुखिनो भवन्ति ॥ ३२॥	Sangkeertya naaraayanashabdamaatram vimuktaduhkhaah sukhino bhavanti || 32||
कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।	Kaayena vaachaa manasendriyairvaa buddhyaatmanaa vaa prakriteh svabhaavaat|
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥ ३३॥	Karomi yadyatsakalam parasmai naaraayanaayeti samarpayaami || 33||
इति श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रं सम्पूर्णम्।	Iti shreevishnordivyasahasranaamastotram sampoornam|
ॐ तत्सत्।	Om tatsat|

Read the meaning, listen and chant along in the Diya app: https://www.trydiya.com/app